# Shri Vainya Stotram

# શ્રીવૈન્યાસ્તોત્રમ્

## Document Information

Text title : Shri Vainya Stotram

File name : vainyAstotram.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# શ્રીવૈન્યાસ્તોત્રમ્

વૈન્યાર્તિહાભયા સિન્ધુઃ પાતુ પાપવિનાશિની ।
દૈન્યાધિહા દયાસિન્ધુર્જન્તુતાપવિનાશિની ॥ ૧॥

વૈન્યાખ્યભક્તેન સમાહૃતેયં નદી યદ્યશ ઈશમેયમ્ ।
ધ્યેયં મહદ્ભિઃ કવિભિશ્ચ ગેયં પેયં પયોઽસ્યા પ્રપુનાતિ સેયમ્ ॥ ૨॥

અયે વૈન્યે ધન્યે સુકૃતિજનમાન્યે જય મહા-
રયેઽજન્યે દૈન્યેર્તિહૃદસિ વદાન્યે ત્વમઘહા ॥

મહાભઙ્ગે ગઙ્ગેવ નૃદુરિતભઙ્ગેહ ભવતી
સતી મર્ત્યોઽમર્ત્યોઽપિ યદમૃતપાનેન ભવતિ ॥ ૩॥

વૈન્યાખ્યગઙ્ગે જનતાપભઙ્ગે પ્રસીદ મે દેવિ મહાતરઙ્ગે ।
પુનીહિ માં સાગસ આર્તબન્ધો બન્ધોચ્છિદે તે સરિતે નમોઽસ્તુ ॥ ૪॥

વૈન્યે દૈન્યહૃતે નમોઽસ્તુ સરિતે વેનાહૃતે સન્મતે ॥

સર્વં માનસિકં ચ વાચિકમઘં દ્રાક્કાયિકં મે હર ॥

બાહ્યાભ્યાન્તરશુદ્ધિકૃત્ત્વમસિ યત્તન્મેઽમ્બ દુર્વાસના-
મુન્મૂલ્યાર્પય પાપતાપશમની શ્રીદેવિ સદ્વાસનામ્ ॥ ૫॥

વેણુવાદનરતાચ્યુતાઞ્ચિતા યા પુરી પુરજિતાપિ રઞ્જિતા ।
સન્તિ યત્ર વિબુધા અનેકશઃ સન્તિ વિપ્રસદનાનિ ભૂરિશઃ ॥ ૬॥

તસ્યાં પદ્માવતીપુર્યાં વૈન્યાસંજ્ઞા મહાધુની ।
મધુનીરા વિજયતે જયતેજોયશપ્રદા ॥ ૭॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીવૈન્યાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Vainya Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*